**PAPER - 1**

# MT

**2018 .... .... 1200** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - I**

**Time : 3 Hours** **(Pages 9)** **Marks : 80**

## प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १
पारम्परिकाणि ऊर्जासाधनानि मर्यादितानि यतः ....... ।
(तेषाम् उपलब्धिः निसर्गतः भवति / तेषाम् उपयोगः न विपुलः)

II) पूर्णवाक्येन उत्तरत । १
कृष्णसुवर्णस्य संस्करणं कथं क्रियते ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
सौरं स्रोतः अमर्यादितम् ।

श्रेया - पारम्परिकाणि अपारम्परिकाणि च तस्याः साधनानि । कृष्णाङ्गाराः,खनितैलं, नैसर्गिकवायुश्चेति पारम्परिकाणि । दशलक्षाधिकवर्षेभ्यः पूर्वं निर्जीवीभूताः प्राण्यंशाः सस्यांशाश्च मृत्तिकायाः महाशिलानां च बहुभारेणान्तः सम्पीडनाद् द्रववायुरूपं प्राप्नुवन्ति । तद् द्रवरूपेन्धनम् अपरिष्कृतं तैलमित्युच्यते । तदेव कृष्णसुवर्णमिति।

पार्थः - तस्योपस्कारार्थं महाप्रयासः आवश्यकः । भूमौ रन्ध्रं निर्माय निष्कास्य च तस्य संस्करणं क्रियते । तत्संस्करणाद् इन्धनतैलं, मृत्तैलं, स्वेदनतैलादिकं निष्पाद्यते । एतन्निसर्गाल्लभ्यते, तस्मात्तस्योपलब्धिः मर्यादिता ।

श्रेया - निसर्गात् प्राप्ता अपारम्परिकी ऊर्जा तु अमर्यादा भवति ।

पार्थः - सूर्यः,पवनः,जलमित्येतानि महाभूतानि । एतानि अपारम्परिकाणि ऊर्जासाधनानि अपि ऊर्जां निर्मातुं समर्थानि । गोमयात्, पर्णावशेषाद्, अवकराच्च जैविकवायुः प्रभवति तथा एरण्डबीजान्मधुकबीजादीक्षुदण्डावशेषाच्च जैविकतैलं निर्मीयते । अणुभ्योऽपि ऊर्जा लभ्यते ।

श्रेया - तथापि एतेषु सौरं स्रोतः अपरिमितम् अक्षयं, प्रदूषणमुक्तं च ।'कोराडी' इत्यत्र औष्णिक्याः ऊर्जायाः प्रकल्पः तथा ट्रॉम्बेतारापुरापुरस्थौ द्वौ अणुविद्युत्प्रकल्पौ प्रसिद्धौ । कोयना-जल-विद्युत्प्रकल्पस्तु अर्वाचीनमहाराष्ट्रस्य भाग्यरेषैव ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । १

१) अवकराच्च = ....... + .......। (अवकर + अच्च / अवकराच् + च / अवकरात् + च)

२) भाग्यरेषैव = ....... + ....... । (भाग्यरेषे + एव / भाग्यरेषा + एव / भाग्यरेषा + इव)

II) मञ्जूषातः उचितं पर्यायशब्दं चित्वा लिखत । १

१) निसर्गः = .........। २) प्रसिद्धः = .........।

(विख्यातः / कुख्यातः / सृष्टिः / विसर्गः)

III) योग्ये विशेषणे चित्वा लिखत । १

१) .......ऊर्जासाधनानि । (महाभूतानि / अपारम्परिकाणि)

२) ........सौरस्रोतः । (अक्षयम् / औष्णिकम्)

IV) गद्यांशे आगते २ पूर्वकालवाचक - धातुसाधित - ल्यबन्त - अव्यये ....... , ......। १

**३. स्वमतप्रकटनम् ।**

उर्जासञ्चयं प्रति युष्माकं योगदानं / साहाय्यं कथं भवेत् ?

**प्र.१. ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

विविधसमस्यानां निराकरणार्थं भिक्षवः गौतमबुद्धं प्रति गच्छन्ति यतः ....... ।

(बौद्धविहारे एतादृशी आज्ञा वर्तते / भगवान् सुगतः एवास्माकं पिता इति भिक्षवः मन्यन्ते स्म)

II) कः कं वदति ? १

कुत्रास्ति ते पुरातनमुपधानम् ?

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

पुरातनवस्तूनाम् उपयोगः नैव कर्तव्यः ।

तत्रासीदेकः विख्यातः बौद्धविहारः । भगवतः सुगतस्य बहवोऽनुयायिनः तत्रोषित्वा तथागत स्योपदेशमनुसरन्तःभिक्षुव्रतानां पालनं कुर्वन्ति स्म । भगवान् सुगत एवास्माकं पिता इत्येवं मन्यन्ते स्म ते भिक्षवः । अतः विविधसमस्यानां निराकरणार्थं ते स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म । एकदा कोऽपि भिक्षुः भगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत्। भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः। तच्छ्रुत्वा प्रसन्नचित्तेन भगवता तस्मै नूतनचीवराणि दत्तानि।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) पूर्वपदं लिखत । १

१) तदाकर्ण्य = ....... + आकर्ण्य । २) मयेति = ....... + इति ।

II) समूहेतरपदं लिखत । १

१) तथागतः, भिक्षुः, सुगतः २) शयनीयम्, जीर्णम्, पुरातनम्

III) विशेषण-विशेष्ययोः मेलनं कुरुत । १

| 'अ' | 'ब' |
|---|---|
| १. जीर्णानि | बौद्धविहारः । |
| २. जीर्णम् | चीवराणि । |
| ३. विख्यातः | |

IV) गद्यांशे आगते २ तृतीयान्तपदे ........, ........ । १

**३. पृथक्करणम् ।** २

**क्रमसंयोजनं कुरुत ।**

i) नूतनचीवराणां प्राप्तिः । ii) पुरातनचीवराणां सदुपयोगविषये कथनम् ।

iii) भगवन्तं प्रति गमनम् । iv) नूतनचीवराणां कृते प्रार्थना ।

**प्र.१. क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

पक्षिमित्रैः वलयाङ्कनं कृतं वर्तते यतः ....... ।

(खगानाम् गणनम् आवश्यकम् / खगानाम् अध्ययनम् आवश्यकम्)

II) पूर्णवाक्येन उत्तरं लिखत । १

कीदृशाः क्रौञ्चाः दूरतः नयनपथमायान्ति ?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

नामशेषान् खगान् द्रष्टुं पर्यटकाः केवलदेवराष्ट्रीयोद्यानम् आगच्छन्ति ।

स्थलपक्षिणां शुष्का तृणस्थली, जलविहगार्थं जलस्थली, आनूपं वा स्थलम् अपि च वृक्षखगानामधिवासभूताः महावृक्षा अपि अत्र विद्यन्ते । नैकानि सारङ्गागाराणि विविधवर्णैः खगैः आवासार्थमङ्गीकृतानि अत्र । वृक्षपक्षिणः, तृणपक्षिणः अपि च जलपक्षिणोऽपि अत्र बहुसंख्यया वसन्ति । तेषां त्रिशतषट्षष्टिमिताश्च प्रजातयः सुखेन वसन्ति क्रीडन्ति च । तित्तिरसदृशाः तृणपक्षिणः क्रीडन्तः दृश्यन्ते । वृक्षेषु चित्रबलाकानां कुलानि कलकलं कुर्वन्ति पर्यटकानां चेतांसि हरन्ति । विविधप्रकारकाः क्रौञ्चाः तृणेषु भक्ष्यं गवेषमाणाः दूरतः नयनपथमायान्ति । जलेषु खगानां बहवः जातिविशेषाः विहरन्तः दृश्यन्ते । श्वेतः चमसचञ्चूः इति पक्षिविशेषः सविशेषं लक्ष्यते । अन्येऽपि पक्षिणोऽत्र शीतवासार्थं देशान्तरादपि आयान्ति । सैबेरिया देशात् आगच्छन्तः अत्र शीततौ वसन्तः क्रौञ्चाः अधुना नामशेषतां गताः इति तु दुःखकरं लज्जास्पदमपि । लद्दाखप्रान्तादपि नैके खगा आगत्य अत्र हिमसमये वसन्ति । एतान् स्थलान्तरितान् खगान् द्रष्टुं तेषां विषये चाधिकं ज्ञातुं पर्यटकाः अभ्यासकाश्च बहुसंख्ययात्र आगच्छन्ति देशविदेशेभ्यः तेषामध्ययनार्थं वलयाङ्कनमपि कृतं वर्तन्ते पक्षिमित्रैः।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) चतुर्थपदं लिखत । १

जलपक्षिणोऽपि : जलपक्षिणः + अपि : पक्षिणोऽत्र : ...... + ......

II) समूहेतरपदं चित्वा लिखत । १

१) क्रीडन्ति, हरन्ति, खेलन्ति २) वृक्षाः, पादपाः, खगाः

III) मञ्जूषातः उचितं विशेषणं चित्वा लिखत । १

१) ........तृणस्थली । २) ........चमसचञ्चूः ।

(आनूपम्, श्वेतः विविधवर्णैः, शुष्का)

IV) गद्यांशे आगते २ हेत्वर्थक-धातुसाधित-तुमन्त-अव्यये ......, ....। १

**३. पृथक्करणम् ।** २




**द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ।।१।।
सस्यगर्भिणी धरणी हरिता
स्वेदबिन्दुभिर्यैरभिषिक्ता
तेषामेव श्रमेण फलिता हसति मेदिनीयम्
हरितक्रान्त्यास्तद् हरितत्वं ध्वजेऽपि पल्लवितम् ।
ध्वजे स्थितेयं हरिताभा मां प्रेरयते सततम्
'जयतु किसानो' वदन्ती ह्यहं नमामि तं कृषकम् ।।२।।

**१. पृथक्करणम् । (स्तम्भपूरणं कुरुत ।)** २

| वर्णः | घोषः | कवयित्री कं नमति? | मेदिनी केन हसति? |
|---|---|---|---|
| | | | |

**२. स्पष्टीकरणम् ।**

'तत्त्वनिकषग्रावा' इति कल्पनायाः स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) विलोमशब्दौ चित्वा लिखत । १

i) लघुता × ...... । ii) दुष्टाः × ........।

II) विशेषण-विशेष्ययोः मेलनं कुरुत । १

| 'अ' | 'ब' |
|---|---|
| 1. मकरन्दतुन्दिलानाम् | मधुकरे । |
| 2. समुपागतवति | महामान्यः । |
| | अरविन्दानाम् । |

तन्मूलं गुरुतायास्तत्सौख्यं तद्यशस्तदौर्जित्यम् ।
तत्सौभाग्यं पुंसां यदेतदप्रार्थनं नाम ।।१।।
समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ।।२।।
दुःखिताः परदुःखेषु निर्लोभा दुर्लभेषु च ।
विपक्षेषु क्षमावन्तः सन्तः सुकृतपादपाः ।।३।।

**२. रिक्तस्थानानि पूरयित्वा प्रथमश्लोकस्य अन्वयं पुनर्लिखत ।** २

यत् एतत् ...... तत् ...... मूलम्, तत् सौख्यम्, तत् यशः, तत् ......, तत् ...... सौभाग्यं नाम ।

**क) अधोदत्तेषु सुभाषितेषु २ सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) धृतिः ......... श्रियः ।।

ii) वंशभवो ......... महिमानम् ।।

iii) रागे ......... प्रशस्यते ।।

**ड) वृत्तनाम चिनुत ।** १

महीपतेः सन्ति न यस्य पार्श्वे कवीश्वरास्तस्य कुतो यशांसि ।
भूपाः कियन्तो न बभूवुरुर्व्यां नामापि जानाति न कोऽपि तेषाम् ।।

अस्य श्लोकस्य वृत्तनाम ......इति । (गीतिः, इन्द्रवज्रा, उपेन्द्रवज्रा)

**तृतीयः विभागः - स्थूलवाचनम् ।**

**प्र.३. पद्यांशान् पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् ।**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

संस्कृतभाषा राष्ट्रभाषा भवितुमर्हति इति भीमरायस्य अभिमतम् ।

II) एकपदेन उत्तरं लिखत । १

भीममैत्रसंवादवृत्तं कुत्र प्रकाशितम् ?

प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ॥१॥
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ॥२॥
संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ॥३॥
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ॥४॥
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ॥५॥
मैत्रोपनाम विद्वान् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ॥६॥
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि ।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः ॥७॥
वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु ।
पाठं पाठं सर्वे प्रभावितास्तस्य चातुर्यात् ॥८॥

२. **पृथक्करणम् । मेलनं कुरुत ।** २

| अ | | ब |
|---|---|---|
| १. तत्संवादं श्रुत्वा | i) | गीर्वाणगिरैव प्रत्युत्ततार । |
| २. मैत्रोपनाम विद्वान् | ii) | सर्वे प्रभाविताः । |
| ३. वृत्तं पाठं पाठं | iii) | सर्वे चकितचकिताः । |
| ४. भीमरायः | iv) | संस्कृतवाण्या निजशङ्काः पप्रच्छ । |

## चतुर्थः विभागः - लेखनकौशल्यम्

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) कथापूर्तिः ।** ५

**मञ्जूषातः उचितशब्दान् चित्वा कथां पुनर्लिखत ।**

अद्यत्वे हॉकीक्रीडा जनानां ....... क्रीडा वर्तते । शतमीटरपरिमिते विशाले ....... एकस्मिन् पक्षे एकादशक्रीडकानाम् अपरस्मिन् पक्षे च इतस्ततः धावतां दृश्यम् अतीव मनोहारि । यदा निपुणक्रीडकेन नीयमानः कन्दुकः परपक्षगोले ....... तदा दर्शकाः करतलध्वनिं कुर्वन्तः ....... उत्साहं वर्धयन्ति । यः दलः अधिकान् गोलकान् करोति स विजयी भवति। हॉकी - प्रतियोगितानां समाचारान् अनेके जनाः श्रुण्वन्ति अथ च दूरदर्शनयन्त्रेभ्योऽपि लक्षशः दर्शका क्रीडकानां खेलचातुर्यं ....... प्रसीदन्ति ।

( दृष्ट्वा, लोकप्रिया, प्रविशति, क्रीडाङ्गणे, विजयिपक्षस्य )

ब) **निबन्धलेखनम् ।**

**३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

i) अश्वः । ii) रक्षाबन्धनम् । iii) दूरदर्शनम् ।

क) **संस्कृतानुवादः ।**

**८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

i) The good people never give up the just path.

ii) Trees make the passers- by happy by their shadow.

iii) A cloth-bag is always with me.

iv) Have you read that news ?

v) justice should punish the guilty.

vi) These flower-ladden trees look beautiful.

vii) Ripe mango is yellow.

viii) Tell the story of the cunning jackal.

ड) **वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१) रक्ष् (१ प.प.) २) वि + तॄ (१ प.प.)

३) याच् (१ आ.प.) ४) कथ् (१० उ.प.)

ii) अशुद्धिसंशोधनम् - अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २ वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१) ज्ञानस्य विना न मोक्षः । २) सर्पस्य भीतिः अस्ति ।

३) गृहेण अभितः विद्यालयं वर्तते । ४) अलम् अतिभोजनात् ।

**पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

अ) **क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|---|
| साध् (५ प.प.) | ......... | ससाध | ......... | साध्नोति | ......... | साध्नुयात् |
| ग्रह् (९ आ.प.) | ......... | ......... | अगृह्णात | ......... | गृह्णीताम् | ......... |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तृतीया | दिशा | ...... | .......... |
| सप्तमी | ..... | जन्मनोः | .......... |
| चतुर्थी | ..... | ........ | एभ्यः |
| पञ्चमी | ...... | आवाभ्याम् | ......... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(वर्तमानः, खण्डिता, खाद्यम्, स्मृतवती, आदिष्टः, कुर्वाणः, श्रवणीयः, दृष्टवान्)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| **समस्तपदम्** | **समासनाम** |
|---|---|
| i) तपसे वनम् । | कर्मधारय |
| ii) ऊर्मिभिः सहः । | इतरेतर द्वन्द्व |
| iii) रक्तौ पक्षौ यस्य सः । | नञ् तत्पुरुष |
| iv) हरिता आभा । | सह बहुव्रीहि |
| v) नाट्यविषयकं शास्त्रम् । | षष्ठी तत्पुरुष |
| vi) शान्तिः च सुखं च । | मध्यमपदलोपी कर्मधारय |
| vii) आत्मनः परिचयः । | चतुर्थी तत्पुरुष |
| viii) न उपलब्धिः । | बहुव्रीहि |

**ढ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) राममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम् । (प्रयोगपरिवर्तनं कुरुत ।)
ii) प्राप्तायां निशायां स निद्राधीनः जातः । (सति-सप्तमीरचनां निष्कासयत ।)
iii) राष्ट्रध्वजः मां कीर्तिकथा स्मारयते । (प्रयोजकरचनां निष्कासयत ।)
iv) भवान् सत्वरमुपचारं करोतु । ( 'भवान्' स्थाने 'त्वम्' योजयत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) साहित्ये ................. रसाः सन्ति । (9)
ii) मम .................. सहायकैर्वैद्यैः चिकित्सकरूपेण कार्यमारब्धम् । (6)
iii) देवक्याः ......अपत्यं नाम भगवान् श्रीकृष्णः । ($8^{th}$)
iv) मम मातामही दिनस्य .....औषधं सेवते । (twice)

## षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

नैकदा व्यवहारे अहं वञ्चितोऽस्मि इति मनुजःस्वयं जानाति । तदा अहं मूर्खोऽस्मीति स दति। किन्तु यदि अन्यः कोऽपि तं मूर्खमिति सम्बोधयति तदा सः क्रुद्धःभवति । मनुजः जानीयात् यदि क्रुध्यामि तर्हि अहमेव मम शत्रुः । यदि अहं स्निह्यामि तर्हि अहमेव मम मित्रम् । कल्पनयैव वयमन्यान् जनान् अमित्रम् अथवा मित्रं मन्यामहे । यो मम अहंकार पुष्यति स मम सखा । यो मम अहंकारं दुनोति स मम वैरी । संक्षेपतः मम मनः एव मम शत्रुः अथवा मम मित्रम् ।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति न हि सर्वविदस्तु सर्वे ।
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्ल्यापि च पुष्पफलैरूपेता ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

कञ्चुकी - (सहसा प्रविश्य) इदं वासोयुगलम् ।
नायकः - (दृष्ट्वा सहर्षमात्मगतम्) दिष्ट्या सिद्धमभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन।
कञ्चुकी - देव्या, मित्रावसुजनन्या प्रेषितम् । तदेतत्परिधत्तां कुमारः ।
नायकः - कञ्चुकिन् उपनय । (कञ्चुकी रक्तवसनद्वयमुपनयति। गृहीत्वा आत्मगतम् ।) सफलीभूतो मे मलयवत्याः पाणिग्रहः । (परिक्रम्य प्रकाशम्) कञ्चुकिन् गम्यताम्। मद्वचनादभिनन्दनीया देवी ।

**Best of Luck**